# Parashuramakrita Gajanana Stuti

# પરશુરામકૃતા ગજાનનસ્તુતિઃ

## Document Information

Text title : Parashuramakrita Gajanana Stuti

File name : gajAnanastutiHparashurAmakRRitA.itx

Category : ganesha, gaNeshapurANa, stuti

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH | adhyAya 82 | 1.82 31-42||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

Parashuramakrita Gajanana Stuti

# પરશુરામકૃતા ગજાનનસ્તુતિઃ

પરશુરામ ઉવાચ ।
સહસ્રાદિત્યસઙ્કાશ ! નમસ્તે જગદીશ્વર ! ।
નમસ્તે સર્વવિઘ્નેશ ! સર્વસિદ્ધિપ્રદાયક ! ॥ ૩૧॥

વિઘ્નાનાં પતયે તુભ્યં નમો વિઘ્નનિવારણ ! ।
સર્વાન્તર્યામિણે તુભ્યં નમઃ સર્વપ્રિયઙ્કર ! ॥ ૩૨॥

ભક્તપ્રિયાય દેવાય નમો જ્ઞાનસ્વરૂપિણે ।
નમો વિશ્વસ્ય કર્ત્રે તે નમસ્તત્પાલકાય ચ ॥ ૩૩॥

નિવારય મહાવિઘ્નં તપોનાશકરં મમ ।
ક ઉવાચ ।
ઇતિ સ્તુતિં સમાકર્ણ્ય સૌમ્યતેજા ગજાનનઃ ॥ ૩૪॥

ઉવાચ રામં સમ્ભ્રાન્તં સ્વસ્યૈવ તિગ્મતેજસા ।
ગણેશ ઉવાચ ।
યં ધ્યાયસિ દિવારાત્રૌ મન્ત્રં જપ્ત્વા ષડક્ષરમ્ ॥ ૩૫॥

વરં દાતું સમાયાતઃ સોઽહં રામ ! તવાધુના ।
વરં વૃણીષ્વ મત્તસ્ત્વં યદ્ યદ્ વાઞ્છસિ ચેતસા ॥ ૩૬॥

બ્રહ્માણ્ડાનામનેકાનાં સૃષ્ટા પાતાઽપહારકઃ ।
નૈવ જાનન્તિ મે રૂપં બ્રહ્માદ્યા મુનયોઽપિ ચ ॥ ૩૭॥

રાજર્ષયશ્ચ સર્વેઽપિ સોઽહં તે દર્શનંગતઃ ।
પરશુરામ ઉવાચ ।
યોઽપ્રમેયોઽખિલાધારઃ સૃષ્ટિસંહારકારકઃ ॥ ૩૮॥

યો ન વેદૈર્ન તપસા ન યજ્ઞૈર્વ્રતસઞ્ચયૈઃ ।
ન દાનૈર્નૈવ યોગૈશ્ચ જનાનાં દૃષ્ટિગોચરઃ ॥ ૩૯॥

સોઽહં ત્વં હિ મયા દૃષ્ટોઽનુગ્રાહાત્તવ વિઘ્નપ ! ।
કિમન્યદ્ વરયે દેવ ! ભક્તિં દેહિ નિજાં દૃઢામ્ ॥ ૪૦॥

ગણેશ ઉવાચ ।
ભવિતા મમ ભક્તિસ્તે દૃઢા રામ ! દ્વિજોત્તમ્ ! ।
પ્રલોભિતસ્યાપિ વરૈર્ન તે બુદ્ધિઃ સુવિહ્વલા ॥ ૪૧॥

પરશું મે ગૃહાણ ત્વં સર્વશત્રુનિબર્હણમ્ ।
નામ તે પરશુરામેતિ ત્રૈલોક્યે ખ્યાતિમેષ્યતિ ॥ ૪૨॥

ઇતિ પરશુરામકૃતા ગજાનનસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીગણેશપુરાણં ઉપાસના (પૂર્વ)ખણ્ડ । અધ્યાય ૮૨ । ૧.૮૨ ૩૧-૪૨॥

- .. shrIgaNeshapurANaM upAsanA (pUrva)khaNDa . adhyAya 82 . 1.82 31-42..

Proofread by Preeti Bhandare

---

*Parashuramakrita Gajanana Stuti*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*